# भज गोविंदं

## भज गोविंदं

मोहमुद्गरः (भज गोविंदं)

भज गोविंदं भज गोविंदं
गोविंदं भज मूढमते |
संप्राप्ते सन्निहिते काले
न हि न हि रक्षति डुकृञ् करणे || 1 ||

मूढ जहीहि धनागमतृष्णां
कुरु सद्बुद्धिं मनसि वितृष्णां |
यल्लभसे निजकर्मोपात्तं
वित्तं तेन विनोदय चित्तं || 2 ||

नारीस्तनभरनाभीदेशं
दृष्ट्वा मा गा मोहावेशं |
एतन्मांसवसादिविकारं
मनसि विचिंतय वारं वारं || 3 ||

नलिनीदळगतजलमतितरळं
तद्वज्जीवितमतिशयचपलं |
विद्धि व्याध्यभिमानग्रस्तं
लोकं शोकहतं च समस्तं || 4 ||

यावद्वित्तोपार्जनसक्त-
-स्तावन्निजपरिवारो रक्तः |
पश्चाज्जीवति जर्जरदेहे
वार्तां कोऽपि न पृच्छति गेहे || 5 ||

यावत्पवनो निवसति देहे
तावत्पृच्छति कुशलं गेहे |
गतवति वायौ देहापाये
भार्या बिभ्यति तस्मिन्काये || 6 ||

बालस्तावत्क्रीडासक्त-
-स्तरुणस्तावत्तरुणीसक्तः |
वृद्धस्तावच्चिंतासक्तः
परे ब्रह्मणि कोऽपि न सक्तः || 7 ||

का ते कांता कस्ते पुत्रः
संसारोऽयमतीव विचित्रः |
कस्य त्वं कः कुत आयात-
-स्तत्त्वं चिंतय यदिदं भ्रांतः || 8 ||

सत्संगत्वे निःसंगत्वं
निःसंगत्वे निर्मोहत्वं |
निर्मोहत्वे निश्चलतत्त्वं
निश्चलतत्त्वे जीवन्मुक्तिः || 9 ||

वयसि गते कः कामविकारः
शुष्के नीरे कः कासारः |
क्षीणे वित्ते कः परिवारो
ज्ञाते तत्त्वे कः संसारः || 10 ||

मा कुरु धनजनयौवनगर्वं
हरति निमेषात्कालः सर्वं |
मायामयमिदमखिलं हित्वा
ब्रह्मपदं त्वं प्रविश विदित्वा || 11 ||

दिनयामिन्यौ सायं प्रातः
शिशिरवसंतौ पुनरायातः |
कालः क्रीडति गच्छत्यायु-
-स्तदपि न मुंचत्याशावायुः || 12 ||

का ते कांताधनगतचिंता
वातुल किं तव नास्ति नियंता |
त्रिजगति सज्जनसंगतिरेका
भवति भवार्णवतरणे नौका || 13 ||

जटिली मुंडी लुंचितकेशः
काषायांबरबहुकृतवेषः |
पश्यन्नपि च न पश्यति मूढो
ह्युदरनिमित्तं बहुकृतवेषः || 14 ||

अंगं गलितं पलितं मुंडं
दशनविहीनं जातं तुंडं |
वृद्धो याति गृहीत्वा दंडं
तदपि न मुंचत्याशापिंडं || 15 ||

अग्रे वह्निः पृष्ठे भानू
रात्रौ चुबुकसमर्पितजानुः |
करतलभिक्षस्तरुतलवास-
-स्तदपि न मुंचत्याशापाशः || 16 ||

कुरुते गंगासागरगमनं
व्रतपरिपालनमथवा दानं |
ज्ञानविहिनः सर्वमतेन
मुक्तिं न भजति जन्मशतेन || 17 ||

सुरमंदिरतरुमूलनिवासः
शय्या भूतलमजिनं वासः |
सर्वपरिग्रहभोगत्यागः
कस्य सुखं न करोति विरागः || 18 ||

योगरतो वा भोगरतो वा
संगरतो वा संगवीहिनः |
यस्य ब्रह्मणि रमते चित्तं
नंदति नंदति नंदत्येव || 19 ||

भगवद्गीता किंचिदधीता
गंगाजललवकणिका पीता |
सकृदपि येन मुरारिसमर्चा
क्रियते तस्य यमेन न चर्चा || 20 ||

पुनरपि जननं पुनरपि मरणं
पुनरपि जननीजठरे शयनं |
इह संसारे बहुदुस्तारे
कृपयापारे पाहि मुरारे || 21 ||

रथ्याकर्पटविरचितकंथः
पुण्यापुण्यविवर्जितपंथः |
योगी योगनियोजितचित्तो
रमते बालोन्मत्तवदेव || 22 ||

कस्त्वं कोऽहं कुत आयातः
का मे जननी को मे तातः |
इति परिभावय सर्वमसारं
विश्वं त्यक्त्वा स्वप्नविचारं || 23 ||

त्वयि मयि चान्यत्रैको विष्णु-
-र्व्यर्थं कुप्यसि मय्यसहिष्णुः |
सर्वस्मिन्नपि पश्यात्मानं
सर्वत्रोत्सृज भेदाज्ञानं || 24 ||

शत्रौ मित्रे पुत्रे बंधौ
मा कुरु यत्नं विग्रहसंधौ |
भव समचित्तः सर्वत्र त्वं
वांछस्यचिराद्यदि विष्णुत्वं || 25 ||

कामं क्रोधं लोभं मोहं
त्यक्त्वात्मानं भावय कोऽहं |
आत्मज्ञानविहीना मूढा-
-स्ते पच्यंते नरकनिगूढाः || 26 ||

गेयं गीतानामसहस्रं
ध्येयं श्रीपतिरूपमजस्रं |
नेयं सज्जनसंगे चित्तं
देयं दीनजनाय च वित्तं || 27 ||

सुखतः क्रियते रामाभोगः
पश्चाद्धंत शरीरे रोगः |
यद्यपि लोके मरणं शरणं
तदपि न मुंचति पापाचरणं || 28 ||

अर्थमनर्थं भावय नित्यं
नास्ति ततः सुखलेशः सत्यं |
पुत्रादपि धनभाजां भीतिः
सर्वत्रैषा विहिता रीतिः || 29 ||

प्राणायामं प्रत्याहारं
नित्यानित्यविवेकविचारं |
जाप्यसमेतसमाधिविधानं
कुर्ववधानं महदवधानं || 30 ||

गुरुचरणांबुजनिर्भरभक्तः
संसारादचिराद्भव मुक्तः |
सेंद्रियमानसनियमादेव
द्रक्ष्यसि निजहृदयस्थं देवं || 31 ||

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविंदभगवत्पूज्यपादशिष्यस्य श्रीमच्छंकरभगवतः कृतौ मोहमुद्गरः संपूर्णं |